# Hayagriva Dhyana Prakaranam

# હયગ્રીવધ્યાનપ્રકરણમ્

## Document Information

Text title : Hayagriva Dhyanaprakaranam

File name : hayagrIvadhyAnaprakaraNam.itx

Category : vishhnu, vAdirAja, vishnu, dhyAnam

Location : doc_vishhnu

Author : vAdirAjayati

Proofread by : Lata Murali, Revathy R.

Latest update : May 24, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 24, 2024

*sanskritdocuments.org*

# હયગ્રીવધ્યાનપ્રકરણમ્

સદા તવ ધ્યેયતયા હૃદબ્જે સ્થિતમચ્યુતમ્ ।
ચિદ્રૂપભદ્રાવયવં ચિત્રભૂષણભૂષિતમ્ ॥ ૧॥

સશ્રીકં સપરીવારં સર્વજ્ઞં સર્વસાક્ષિણમ્ ।
આવાહ્ય પ્રતિમામધ્યે ધ્યાયસ્વ નૃતુરઙ્ગમમ્ ॥ ૨॥

કરસ્થમુદ્રાશઙ્ખાક્ષપુસ્તકં રમ્યહસ્તકમ્ ।
ચન્દ્રાભં ચન્દ્રબિમ્બસ્થં ચન્દનોક્ષિતવક્ષસમ્ ॥ ૩॥

ચારુપ્રસન્નવદનં ચલત્કુન્તલસન્તતિમ્ ।
સુકર્ણગણ્ડભ્રૂયુગ્મં સુનાસોષ્ઠં શુચિસ્મિતમ્ ॥ ૪॥

સુધારસાર્દ્રસર્વાઙ્ગં શોકમોચનલોચનમ્ ।
શ્રીવત્સકૌસ્તુભધરં શ્રિતભક્તધુરન્ધરમ્ ॥ ૫॥

વનમાલાવૈજયન્તીકન્ધરં લોકસુન્દરમ્ ।
કૃશમધ્યં વિશાલોરઃસ્થલં પીનચતુર્ભુજમ્ ॥ ૬॥

દુષ્ટાનિષ્ટદશિષ્ટેષ્ટપુષ્ટબાહુચતુષ્ટયમ્ ।
વૃત્તદીર્ઘચતુર્હસ્તૈઃ શ્રુત્યર્થચતુરર્થદમ્ ॥ ૭॥

કરાખ્યામ્ભોજસમ્ભૂતદલોપમશુભાઙ્ગુલમ્ ।
અશ્વગ્રીવં દૃષ્યપાર્શ્વં લક્ષ્યકક્ષ્યસ્તનદ્વયમ્ ॥ ૮॥

મનોજ્ઞપૃષ્ઠપ્રભયા તૃણીકૃતશશિદ્યુતિમ્ ।
તનૂદરં નિમ્નનાભિં મનોહરવલિત્રયમ્ ॥ ૯॥

લસદ્રોમલતાભાસા વશીકૃતરમાદૃશમ્ ।
બૃહત્કટિતટદ્વન્દ્વમપ્રતિદ્વન્દ્વમવ્યયમ્ ॥ ૧૦॥

વર્તુલોરું વૃત્તજાનુજઙ્ઘાઙ્ગુલિનખાવલિમ્ ।
અતિરક્તાઙ્ઘ્રિયુગલતનુકોમલપલ્લવમ્ ॥ ૧૧॥

ધ્વજવજ્રપતાકાબ્જાઙ્કુશરેખાભિરઞ્જિતમ્ ।
રક્તાસ્યાબ્જં રક્તપદ્મસમશ્રીમત્પદદ્વયમ્ ॥ ૧૨॥

ચતુર્હસ્તારુણતલં ચતુર્વેદપ્રવર્તકમ્ ।
ચતૂરૂપશ્રિયા જુષ્ટં ચતુર્વર્ણાશ્રમપ્રિયમ્ ॥ ૧૩॥

ચતુર્મૂર્તિધરં ચિત્રં ચતુર્યુગનિયામકમ્ ।
ચતુર્વિધાનાં મુક્તાનાં ચતુર્વિધસુખપ્રદમ્ ॥ ૧૪॥

ચતુરાસ્યગુરું ધીરં ચતુરં શ્રીહયાનનમ્ ।
કરુણાર્દ્રકટાક્ષાભ્યાં કલિકલ્મષખણ્ડનમ્ ॥ ૧૫॥

ખલૌઘદણ્ડનં શાન્તં કમનીયતમં સ્મર ।
ચિત્રરત્નોચ્ચમકુટં રત્નગ્રૈવેયરઞ્જિતમ્ ॥ ૧૬॥

રત્નોદ્યત્તિલકં રત્નકુણ્ડલદ્વયમણ્ડિતમ્ ।
સદ્રત્નભુજકીર્તિભ્યાં હૃદ્યાંસદ્વયમદ્વયમ્ ॥ ૧૭॥

રત્નહારસરૈર્યુક્તં રત્નયજ્ઞોપવીતિનમ્ ।
રત્નોજ્જ્વલોત્તરીયં ચ રત્નમધ્યવિભૂષિતમ્ ॥ ૧૮॥

રમણીયં રત્નકાઞ્ચ્યા રત્નકિઙ્કિણિરાજિતમ્ ।
રત્નોદ્યત્કટિસૂત્રેણ બદ્ધવિદ્યુત્પ્રભામ્બરમ્ ॥ ૧૯॥

રત્નાઙ્ગુલીયકં રત્નકઙ્કણાઙ્ગદભાસ્વરમ્ ।
વિચિત્રરત્નોલ્લસિતવીરતોચિતભૂષણમ્ ॥ ૨૦॥

નવરત્નમયોત્તુઙ્ગરણત્કનકનૂપુરમ્ ।
સ્ફુરદ્રત્નચયોદ્ભાસિક્વણત્પૌરુટકિઙ્કિણિમ્ ॥ ૨૧॥

રત્નમુદ્રાઙ્ગુલીયૈશ્ચ દીપ્તપાદદ્વયાઙ્ગુલિમ્ ।
તુલસીકુન્દમન્દારકુસુમૈશ્ચ સદાઽર્ચિતમ્ ॥ ૨૨॥

રત્નમણ્ટપમધ્યસ્થં રત્નપદ્મોપરિ સ્થિતમ્ ।
રત્નોલ્લસત્ફણશ્રેણ્યા છત્રાયિતફણીશ્વરમ્ ॥ ૨૩॥

ચિત્રરત્નમયચ્છત્રચામરાદ્યૈશ્ચ સત્કૃતમ્ ।
સપ્તાવરણદેવૈશ્ચ સહિતં તે હિતં સ્મર ॥ ૨૪॥

ચતુર્દિક્ષુ ચતુર્દ્વારગતૈશ્ચણ્ડજયાદિભિઃ ।
દ્વાઃસ્થૈશ્ચક્રગદાહસ્તૈર્જુષ્ટમિષ્ટકરં સ્મર ॥ ૨૫॥

મધ્વહૃત્પદ્મમધ્યસ્થં હૃદ્યદં બુદ્ધિશુદ્ધિદમ્ ।
સદ્યો વિજયદં સિદ્ધસાધ્યારાધ્યપદં સ્મર ॥ ૨૬॥

તત્ત્વાનાં માતૃકાણાં ચ વર્ણાનાં ચૈવ દેવતાઃ ।
શાસ્ત્રોક્તવર્ત્મના વિષ્ણોરઙ્ગેષ્વર્પય સાદરમ્ ॥ ૨૭॥

પઞ્ચાઙ્ગં વા ષડઙ્ગં વા ન્યાસં કૃત્વા પુનર્હરેઃ ।
સંસ્મૃત્ય ચરણૌ મન્ત્રાઞ્ચપ પ્રણવપૂર્વકાન્ ॥ ૨૮॥

પઞ્ચામૃતૈઃ શુદ્ધજલૈઃ કલશસ્થોદકૈરપિ ।
મન્ત્રપૂતૈઃ સ્નાપયિત્વા સપીઠાવરણામ્બરમ્ ॥ ૨૯॥

અર્ઘ્યાદ્યૈરુપચારૈશ્ચ તોષયિત્વા જનાર્દનમ્ ।
તુલસીમઞ્જરીભિશ્ચ પુષ્પૈશ્ચ વિવિધૈરપિ ॥ ૩૦॥

આરાધ્ય ધૂપદીપૌ ચ દત્વા સ્તુત્વા પુનર્હરિમ્ ।
સરસૈઃ ફલપક્વૈશ્ચ ભક્ષ્યભોજ્યરસાયનૈઃ ॥ ૩૧॥

સસિતૈર્ઘૃતસિક્તૈશ્ચ પાયસૈર્વિવિધૈરપિ ।
દધ્યોદનેન ચિત્રાન્નૈસ્તર્પયાઽવરણાન્વિતમ્ ॥ ૩૨॥

દયાર્દ્રહૃદયં ભક્તવત્સલં પુરુષોત્તમમ્ ।
પુનર્ગણ્ડૂષાચમનમુખવસ્ત્રાદિકં દિશ ॥ ૩૩॥

કર્પૂરખણ્ડસહિતં તામ્બૂલં ચ નિવેદય ।
પુનર્ધૂપેન દીપેન ચિત્રૈરારાર્તિકૈરપિ ॥ ૩૪॥

મન્ત્રપુષ્પૈઃ સ્તવૈર્ગીતૈર્નૃત્યવાદિત્રપૂર્વકૈઃ ।
અર્ચયિત્વા નમસ્કૃત્ય કુરુ ચાન્તે પ્રદક્ષિણમ્ ॥ ૩૫॥

શ્રિયા ચ ધરયા ચૈવ સ્વરૂપાવરણૈરપિ ।
અનન્તબ્રહ્મવાય્વીશવીશૈઃ શક્રાદિકૈઃ સુરૈઃ ॥ ૩૬॥

કૃતાઞ્જલિપુટૈર્નિત્યં પરિવારતયા સ્થિતૈઃ ।
પીઠદેવૈશ્ચ સહિતમેવં કાલત્રયેઽર્ચય ॥ ૩૭॥

ભક્તિયુક્તિસ્ફૂર્તિશક્તિકીર્ત્યનાર્તિધૃતિસ્મૃતીઃ ।
વિરક્તિભક્તિમુક્તીશ્ચ સુખવ્યક્તીશ્ચ યાચય ॥ ૩૮॥

કર્તારં ચૈવ ધર્તારં પ્રવક્તારં હયાનનમ્ ।

ધ્યાતું ગાતું શ્રમં જેતું વાદિરાજોઽકૃત સ્તવમ્ ॥ ૩૯॥

ઇતિ શ્રીમદ્વાદિરાજપૂજ્યચરણવિરચિતં
હયગ્રીવધ્યાનપ્રકરણં સમાપ્તમ્ ।

ભારતીરમણમુખ્યપ્રાણાન્તર્ગત શ્રીકૃષ્ણાર્પણમસ્તુ ।

Proofread by Lata Murali

---

*Hayagriva Dhyana Prakaranam*

pdf was typeset on May 24, 2024

Please send corrections to *sanskrit@cheerful.com*